# E-CONTENT

Prepared by


## MR. SOMNATH CHAKRABORTY

**State Aided College Teacher**

**Department of Sanskrit**

## BARJORA COLLEGE

**NAAC ACCREDITED 'B'**
**Affiliated to the Bankura University**
**Barjora, Bankura, West Bengal, Pin-722202**
**Estd. – 1985**


## E-CONTENT FOR

**Semester:** 5th Semester

**Students:** Sanskrit Honours

**Course Code:** AHSNS 501C-11

**Course Title:** Sanskrit Grammar (Siddhantakoumudi Karaka)

## TOPIC OF THE E-CONTENT

**॥ अपादानकारकविधायकानि षट् सूत्राणि ॥**

**(Apadankarakavidhayakani Shat Sutrani)**

# ॥ अपादानकारकविधायकानि षट् सूत्राणि ॥

भगवता पाणिनिना 'कारके' इत्यधिकृत्यादौ अपादानसंज्ञाविधायकानि सूत्राण्युक्तानि । प्रश्नानुसारमपादानसंज्ञाविधायकानि षट् सूत्राणि निम्नरीत्या प्रदर्श्यन्ते -

**१. ध्रुवमपायेऽपादानम् २. भीत्रार्थानां भयहेतुः ३. पराजेरसोढः ४. वारणार्थानामीप्सितः ५. अन्तर्धौ येनादर्शनमिच्छति ६. आख्यातोपयोगे इति ।**

**१.ध्रुवमपायेऽपादानम्-** तत्रापायो विश्लेषस्तस्मिन् साध्ये ध्रुवमवधिभूतं कारकमपादानसंज्ञं स्यात् इति प्रथमसूत्रार्थः। वृक्षात् पत्रं पतति, देवदत्तो धावतोऽश्वात्पतति इत्यादीन्युदाहरणानि।

**२.भीत्रार्थानां भयहेतु** - भयार्थानां त्राणार्थानाञ्च धातूनां प्रयोगे भयहेतुरपादानसंज्ञं स्यादिति द्वितीयसूत्रार्थः। चौराद् बिभेति, व्याघ्रात् त्रायते इत्यादीन्युदाहरणानि ।

**३.पराजेरसोढः-** पराजेः प्रयोगेऽसह्योऽर्थोऽपादानं स्यादिति तृतीयसूत्रार्थः । अध्ययनात्पराजयतेऽलस इत्युदाहरणम् ।

**४.वारणार्थानामीप्सितः-** प्रवृत्तिविघातरूपवारणार्थानां धातूनां प्रयोगे ईप्सितोऽर्थोऽपादानं स्यादिति चतुर्थसूत्रार्थः । देवदत्तो यवेभ्यो गां वारयतीत्युदाहरणम् । -

**५.अन्तर्धौ येनादर्शनमिच्छति-** व्यवधाने सति यत्कर्तृकस्यात्मनो दर्शनस्याभावमिच्छति तदपादानं स्यादिति पञ्चमसूत्रार्थः । मातुर्निलीयते कृष्ण इत्याद्युदाहरणम् ।

**६.आख्यातोपयोगे-**नियमपूर्वकविद्यास्वीकारे वक्तापादानसंज्ञः स्यादिति षष्ठसूत्रार्थः । शिष्य उपाध्यायादधीते इत्युदाहरणम् ।

इदानीम् अपादानकारकसंज्ञाविधायकस्य ध्रुवमपायेपादानम् इति सूत्रस्य व्याख्या अधस्तात् दीयते-

# ध्रुवमपायेऽपादानम्

**सूत्रावतरणम्-** संस्कृतभाषायाम् तावत् षट् कारकाणि सन्ति। कर्ता, कर्म, करणं, सम्प्रदानम्, अपादानम्, अधिकरणं चेति। एतेषु अपादानं किं भवति इति प्रतिपादयितुं *ध्रुवमपायेऽपादानम्* इति सूत्रं रचितवान् भगवान् पाणिनिः।

**सूत्रव्याख्या-**

**संज्ञा च परिभाषा च विधिर्नियम एव च।**

**अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम् ॥** इति वचनानुसारं सूत्रमिदं संज्ञासूत्रम्

इदम् संज्ञासूत्रम्। इदं सूत्रं कारकसंज्ञाम् अपादानसंज्ञां च करोति। सूत्रेऽस्मिन् त्रीणि पदानि सन्ति। ध्रुवम् इति प्रथमैकवचनान्तं पदम्। अपाये इति सप्तम्येकवचनान्तं पदम्। अपादानम् इति प्रथमैकवचनान्तं पदम्। कारकम् इति अधिकारः अत्र आगच्छति। अपाये ध्रुवम् कारकसंज्ञं सत् अपादानसंज्ञं भवति इति वाक्ययोजना। अत्र ध्रुवम् इत्यस्य धात्ववाच्यविभागाश्रयः इत्यर्थः। अपाये इत्यस्य विभागे सति इत्यर्थः। एवञ्च सूत्रार्थो भवति विभागे सति यः धात्ववाच्यविभागाश्रयः सः कारकसंज्ञः सन् अपादानसंज्ञः भवति।

**उदाहरणम्-** पत्रं वृक्षात् पतति। मैत्रः ग्रामात् गच्छति।

**सूत्रार्थसमन्वयः-** पत्रं वृक्षात् पतति। अस्मिन् वाक्ये वृक्षः अपादानम् अस्ति। अतः तत्र सूत्रार्थस्य समन्वयः क्रियते। तथाहि अत्र पत्रस्य पतनेन पत्रवृक्षयोः मध्ये विभागः जायमानः अस्ति। अतस्तस्य ध्रुवमपायेऽपादानम् इति सूत्रेण कारकसंज्ञा भूत्वा अपादानसंज्ञा च भवति इति शिवम्।